# પ્રાતઃ પ્રાર્થના

ૐ પૂર્ણમદઃ પૂર્ણમિદં, પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય, પૂર્ણમેવાવશિષ્યતે ॥

## આત્મષટક્

મનોબુદ્ધયહંકારચિત્તાનિ નાહં,
ન ચ શ્રોત્રજિહ્વે, ન ચ ઘ્રાણનેત્રે ।
ન ચ વ્યોમભૂમિર્ન, તેજો ન વાયુઃ
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૧॥
ન ચ પ્રાણસંજ્ઞો, ન વૈ પંચવાયુ-
ર્ન વા સપ્તધાતુર્ન, વા પંચકોશઃ
ન વાક્ પાણિપાદૌ, ન ચોપસ્થપાયૂ
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૨॥
ન મે દ્વેષરાગૌ, ન મે લોભમોહૌ
મદો નૈવ મે નૈવ, માત્સર્યભાવઃ ।
ન ધર્મો ન ચાર્થો, ન કામો ન મોક્ષઃ
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૩॥
ન પુણ્યં ન પાપં, ન સૌખ્યં ન દુઃખં
ન મંત્રો ન તીર્થં, ન વેદા ન યજ્ઞાઃ ।
અહં ભોજનં નૈવ, ભોજ્યં ન ભોક્તા
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૪॥
ન મે મૃત્યુશંકા, ન મે જાતિભેદઃ
પિતા નૈવ મે નૈવ, માતા ન જન્મ ।
ન બંધુર્ન મિત્રં, ગુરુર્નૈવ શિષ્ય ઃ ।
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૫॥
અહં નિર્વિકલ્પો, નિરાકારરૂપો
વિભુર્વ્યાપ્ય સર્વત્ર, સર્વેન્દ્રિયાણામ્ ।
સદા મે સમત્વં, ન મુક્તિર્ન બન્ધ ઃ
ચિદાનંદરૂપઃ, શિવોઽહં શિવોઽહમ્ ॥૬॥

ૐ ભદ્રં કર્ણેભિઃ, શૃણુયામ દેવાઃ ।
ભદ્રં પશ્યે,માક્ષભિર્યજત્રાઃ ॥
સ્થિરૈરઙ્ગૈ,સ્તુષ્ટુવાંસસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં, યદાયુઃ ॥

સ્વસ્તિ નઃ ઈંદ્રો, વૃદ્ધશ્રવા ઃ ॥
સ્વસ્તિ નઃ, પૂષા વિશ્વવેદાઃ ॥
સ્વસ્તિ નસ્તાર્ક્ષ્યો, અરિષ્ટનેમિઃ ।
સ્વસ્તિ નો, બૃહસ્પતિર્દધાતુ ॥

પ્રણોદેવી સરસ્વતી, વાજેભિર્વાજિનીવતી ।
ધીનામવિત્ર્યવતુ ॥
ચોદયિત્રી સૂનૃતાનાં, ચેતંતી સુમતીનામ્ ।
યજ્ઞં દધે સરસ્વતી ॥

મહોઅર્ણઃ સરસ્વતી, પ્રચેતયતિ કેતુના ।
ધિયો વિશ્વા વિરાજતિ ॥

અસતો મા, સદ્ ગમય ।
તમસો મા, જ્યોતિર્ગમય ।
મૃત્યોર્માઽમૃતં ગમય ॥

**ૐ શાંતિઃ શાંતિઃ શાંતિઃ**